# 3
# सोपसर्गधातवः

वि.आर्.मनोज्

उपसृष्टात् सृज विसर्गे (तुदा.१४१७) इत्यस्मात् 'पुंसि सँज्ञायां घः प्रायेण' (पा.सू.३.३.११८) इति कर्तरि घः। 'चजोः कुघिण्यतोः' (पा.सू.७.३.५२) इति कुत्वम्। प्रातिपदिकविभक्तिकार्येषूपसर्गः। उपगृह्याख्यातं तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः प्रादयः। 'उपसर्गाः क्रियायोगे' (पा.सू.१.४.८०) इति व्याहृतास्ते 'ते प्राग्धातोः' (पा.सू.१.४.८०) इत्यनुशासनाद्धातोः प्राक्प्रयुज्यन्ते। संहितैकपदे नित्या नित्या धातूपसर्गयोः इत्यादिहरिवचनैस्तयोरव्याहता संहिता।

उपसर्गाणामर्थवत्वे मतभेदाः वर्तन्ते। *न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः।* पदादपगतानां वर्णानामिव नामाख्यातमध्यान्निष्कृष्य पदवाक्यरूपेण पृथग्विरचितानामेषां साक्षादर्थाभिधानशक्तिर्नास्तीति शाकटायन आचार्यो मनुते। एतेन नैतेषां प्रातिपदिकत्वहानिः। 'कृत्तद्धितसमासाश्च' (पा.सू.१.२.४६) इत्यत्र चकारेण तेषां सङ्गृहीतत्वात्। किञ्च *नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति उपसर्गाः*। नामशब्दोऽत्र धातुजनामपरः। सिद्धावस्थापन्नायाः क्रियायास्तत्र विद्यमानत्वात्। यथा प्रदीपसंयोगे द्रव्यस्य गुणविशेषोऽभिव्यज्यमानो द्रव्याश्रय एव भवति न प्रदीपाश्रयस्तद्वन्नामाख्यातयोः क्रियारूपेऽर्थे विशेषं कञ्चिदुपसंयुज्य तद्वलेनार्थान् द्योतयन्तीत्युपसंयोगद्योतका भवन्त्युपसर्गाः। न तु स्वातन्त्र्येणार्थाभिधाने समर्थास्तस्मादनर्थकाः पृथगवस्थिता उपसर्गा इति भावः।

अन्ये त्वेतेषामनेकार्थत्वमुपपादयन्ति। यथा वर्णवत्पृथगनर्थका उपसर्गा इत्युक्तन्निराकुर्वन्नाचष्टे *उच्चावचाः पदार्था भवन्तीति गार्ग्यः*। उच्चाश्चावचाश्चोच्चावचा बहुप्रकारा इत्यर्थः। नामाख्याताभ्यां वियुक्तानामप्युपसर्गाणामर्था भवन्तीति गार्ग्य आचार्यो मन्यते। यथा हि मृदोऽवयवेषु मृण्मयभाण्डारम्भशक्तिरस्त्येवैवं वर्णेष्वपि सामान्याभिधानशक्तिः। सा तु पदत्वेन समुदितानामर्थविशेषेऽवतिष्ठते। अन्यथा वर्णैरनर्थकैरारभ्यमाणं पदमप्यनर्थकमेव स्यात्। पदैश्च वाक्यं वाक्यैः शास्त्रमित्यर्थ वन्तो वर्णाः। यदुक्तं प्रदीपवदनर्थका उपसर्गा इति। तदप्ययुक्तम्। प्रदीपोऽपि स्वेनार्थेन प्रकाशाख्येनार्थवानेव। सत्यपि चार्थ वत्वे प्रकाश्यमर्थमाधारभूतं घटादिं प्रत्याययन् स्वां प्रकाशनशक्तिमभिव्यनक्ति। तदुक्तं *तद्य एषु पदार्थः प्राहुरिमे तम्। नामाख्यातयोरर्थविकरणम्* इति। तदिति प्रसिद्धार्थकमव्ययम्। य एषूपसर्गेषु वाचकतासम्वन्धेन विद्यमानः स्वकीयोऽनेकप्रकारकोऽर्थस्तमिमे उपसर्गाः पृथगपि सन्तोऽभिदधत्येवेत्येतत्प्रसिद्धम्। यथा प्रःशक्तितृप्तिशुद्ध्यग्रादिकृतीच्छासु

पूजायामित्यादि। कं तमर्थमित्याह अर्थविकरणमिति। अर्थविक्रियामर्थभेदमिति यावत्। अर्थवन्तोऽपि सन्तः स्वार्थाभिधानशक्तिमनेकप्रकारां विद्यमानामपि स्वार्थाभिधानशक्त्याधारभूते नामाख्याते प्रत्याय्याभिव्यञ्जयेयुः। न चैवं वाच्यं नामाख्यातयोरेवासावर्थ उपसर्गसंयोगे सत्युपजायत इति। नहि लोके यो यत्र समर्थो भवति स तत्रान्यमपेक्षते। नामाख्याते चार्थविशेषं प्रत्युपसर्गसंयोगमपेक्षते। तस्मादुपपन्नमुपसर्गस्य क्रियाविशेषोऽर्थः। क्रियासामान्यमात्रञ्चाख्यातस्येति। तस्मादर्थवन्त एवोपसर्गाः पृथगवस्थिता अपीति भावः। सर्वमिदं स्पष्टं निरुक्ते।

धातूनामनेकार्थत्वाद्धातुपाठे कृतोऽर्थनिर्देशः प्रायिकः। अत एव भवतेः प्रक्रियावर्णनाप्रसङ्गे सत्ताद्यर्थनिर्देशश्चोपलक्षणमित्युपक्रम्य यागात्स्वर्गो भवतीत्यादावुत्पद्यत इत्याद्यर्थादिति भट्टोजीदीक्षितः। उपसर्गास्त्वर्थविशेषस्य द्योतकाः। प्रभवति। पराभवति। सम्भवति। अनुभवति। अभिभवति। उद्भवति। परिभवतीत्यादौ विलक्षणार्थावगतेः। यथा -

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहारसंहारविहारपरिहारवत्।। इति च तत्रैवोक्तम्।

स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः अनुलापो मुहुर्भाषा विलापः परिदेवनं विप्रलापो विरोधोक्तिः सॅल्लापो भाषणं मिथः सुप्रलापः सुवचनमपलापस्तु निह्नवः इति लप व्यक्तायां वाचि (भ्वा.४०२) इत्यस्य धातोरुपसर्गवशादनेकेष्वर्थेषु प्रयोगप्रदर्शनपरः कोशोऽत्र दृष्टान्तः।

तद्वत्सत्तायां प्राप्तिसम्पत्तिजन्मसु आद्योपलम्भे पर्याप्तौ सामर्थ्ये सम्भावनायां माने साहित्ये शक्तिप्राप्त्योः प्राकट्ये च भू सत्तायाम् (भ्वा.१) इति धातुः प्रयुक्तो दृश्यते। यथा सत्तायां भवतीति प्रयोगः। काले काले भवति भवतो यस्य संयोगमेत्येति कालिदासः (मेघ.१.१२)। प्राप्तिसम्पत्तिजन्मसु आद्योपलम्भे पर्याप्तौ सामर्थ्ये च प्रभवति। कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यामिति कालिदासः (मेघ.१.११)। सम्भावनायां माने साहित्ये च सम्भवति। शक्तिप्राप्त्योः विभवति। प्राकट्ये व्युद्भवति। महान् हि भवतेः प्रयोगविषयः। तस्यायमेकदेशः। अतो ह्यर्थान्तरेष्वस्य प्रयोगा यथासम्भवमनुसन्धेयाः। यथा वै जन्मनि उद्भवति। प्रत्यक्षे अनुभवति। अनादरे परिभवति। अभिभवे अभिभवति। भङ्गे पराभवति।

अयञ्च सर्वधातुसाधारणो विषयः। किन्तु केचन धातवो नित्यमुपसृष्टा एव प्रयोगपथे दृष्टा इत्यतस्तेऽस्मिन् प्रबन्धे यथोपलब्धि भ्वाद्यादिगणशः सङ्गृह्यन्ते। ये तु केचित्प्रायेणोपसृष्टास्तेऽपि सङ्गृह्यन्ते। तेषामन्येष्वर्थेयु प्रयोगे सत्यपि अमुकस्मिन्नर्थेऽमुनोपसर्गेणैव प्रयोग इति लोके दर्शनात्। प्रयुक्तानेव खल्विदमन्वाख्याति व्याकरणम्। तथा हि -

भ्वादौ

१. रेकृ शङ्कायाम् (भ्वा.८०) इत्यस्य रेकत इति रूपम्। किन्त्वयमाङ्पूर्वः संशये। *आरेकं संशयं प्राहुरिति वचनात्* इति धातुवृत्तिः। आरेकते। संशेत इत्यर्थः।

२. आङः शसि इच्छायाम् (भ्वा.६२९)। आङः शसीति पाठादयमाङ्पूर्व एव प्रयोक्तव्यः। तथा च काश्यपः *अयमाङ्पूर्व एव प्रयोक्तव्य* इति। *न च केवलो नाप्युपसर्गान्तरपूर्वः* इति धातुवृत्तिः। आशंसते इति।

अदादौ

३. इङ् अध्ययने (अदा.१०४७)। नित्यमधिपूर्व इति धातुवृत्तिः। अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीत इति श्रीहर्षः (नैष.३.१७)।

४. आङः शासु इच्छायाम् (अदा.१०२३) इति धातुपाठे। आशास्ते।

दिवादौ

५. अनो रुध कामे (दिवा.११७५)। रुधेरनूपसृष्टस्य कामे वृत्तस्य दिवादित्वमात्मनेपदित्वञ्चेति धातुवृत्तिः।

६. राधोऽकर्मकाद्वृद्धावेव (दिवा.११८०)। अपपूर्वो विपूर्वो वा द्रोहार्थे प्रयुक्तो दृश्यते। राधधातो वृद्धावेव श्यन्निति व्याख्यायामकर्मकादिति विशेषणं व्यर्थं स्याद् वृद्धावस्याकर्मकत्वात्। राधेरर्थान्तरे च श्यन् न स्यात्। इष्यते हि अपराध्यतीत्यादौ द्रोहाद्यर्थेऽपि श्यन्। अत एवकारो भिन्नक्र मः। अकर्मकादित्यत्र सम्बध्यते। तथा चास्माद्धातोरकर्म कादेव श्यन्निति फलति। वृद्धिग्रहणं तूदाहरणप्रदर्शनार्थं यथा वृद्धावकर्मक इति। एतेन न दूये सात्वतीसूनुर्य न्मह्यमपराद्ध्यति (शिशु.२.११), क्रि यासमभिहारेण विराद्ध्यन्तं क्षमेत कः (शिशु.२.४३) इत्यादयः प्रयोगाः सिद्ध्यन्ति। यन्मह्यमपराध्यति दुह्यतीति यावदिति तद्व्याख्यायां मल्लिनाथः। एवञ्चार्थान्तरेऽपि श्यन् सिद्ध्यति। शत्रुं हिनस्तीत्यर्थे शत्रुमपराध्नोतीत्यत्र सकर्मकत्वान्न श्यन्। राध संसिद्धाविति स्वादौ पठितस्येदमुदाहरणम्। एवञ्च वृद्धिग्रहणमकर्मकक्रि यामात्रोपलक्षणमिति भावः। दैवं पर्यालोचयतीत्यर्थे विप्रश्नेऽर्थे तथा आयत्तावर्थे पाकेऽर्थे च राध्यतीति प्रयुज्यते। द्रोहार्थे ऽपपूर्वस्य विपूर्वस्य वा प्रयोगः प्रचुरः।

तुदादौ

७. ओविजी भयचलनयोः। प्रायेणाममुत्पूर्वः। उद्विजते। इति धातुवृत्तिः।

८. उछी विवासे (तुदा.१२९६) प्रायेणायं विपूर्वः। व्युच्छति इति कौमुदी।

चुरादौ

९. आङः क्र न्द सातत्ये (चुरा.१७२८)। भौव्वादिकः क्रुन्द धातुराह्वानाद्यर्थ उक्तः। स एवाङ्पूर्वो णिचं लभते सातत्ये। आक्रन्दयति। अन्ये तु *आङ्पूर्वो घुषिः क्रन्दसातत्ये* इत्याहुः। आघोषयति। इति प्रकृतधातुविवरणे कौमुदी। तृणाग्रलग्नैस्तुहिनैः पतद्भिराक्रन्दतीवोषसि शीतकाल इति कालिदासः (ऋतु.४.७)।

१०. शिष असर्वोपयोगे (चुरा.१८१८)। विपूर्वोऽतिशये। विशेषयति - विशेषति। इति धातुवृत्तिः। ‘आधृषाद्वा’ (गणसूत्रम्) इति धृषधातुमभिव्याप्य विभाषितणिचो धातवः पठिताः। तत्रायं शेषयतिः। तेन णिजभावे विशेषति। णिचि विशेषयति। मास्मायं शिष हिंसार्थः (भ्वा.६८७) इत्यस्य रूपमिति मुह्यत्।

११.आङः षद पद्यर्थे (चुरा.१८३२)। इति धातुपाठः। आसादयति - आसीदति। प्राग्वदत्राधृषीयो णिज्विकल्पः। णिचि आसादयति। णिजभावपक्षे ‘पाघ्राध्मास्थाम्नादाण्’ (पा.सू.७.३.७८) इत्यादिना सीदादेशे आसीदति।

१२.कठि शोके (चुरा.१८४८)। कठिः प्रयेणोत्पूर्व उत्कण्ठावचन इति धातुवृत्तिः। उत्कण्ठति - उत्कण्ठयति। अत्राप्याधृषीयो णिज्विकल्पः।

१३.तनु श्रद्धोपकरणयोः। उपसर्गाच्च दैर्घ्ये। चन श्रद्धोपहननयोरित्येके (चुरा.१८४१)। वितानयति। दैर्घ्यमायामः।

सति सम्भवे इतोऽन्यत्रापि प्राचीनमतानुसारिषु धातुपाठेषु वा सोपसर्गधातूनां प्रयोगा अनुसन्धेयाः।

[उपयुक्तग्रन्थाः]

- ऋतुसंहारम्।
- निरुक्तम्।
- नैषधम्।
- माधवीया धातुवृत्तिः।
- वाक्यपदीयम्।
- शिशुपालवधम्।
- सपरिशिष्टा सिद्धान्तकौमुदी तद्व्याख्याने तत्वबोधिनी बालमनोरमा च।

---